# Shri Paramananda Sandoha Kavacham

# શ્રીપરમાનન્દસન્દોહકવચમ્

## Document Information

Text title : Radha Paramananda Sandoha Kavacham

File name : paramAnandasandohakavacham.itx

Category : devii, devI, kavacha, rAdhA

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 17, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2026

*sanskritdocuments.org*

# શ્રીપરમાનન્દસન્દોહકવચમ્

ૐ હ્રીં અસ્ય શ્રીપરમાનન્દસન્દોહકવચમહાસ્તોત્રમહામન્ત્રસ્ય,
શ્રીનારાયણ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ, શ્રીરાધિકા ત્રિપુરસુન્દરી
દેવતા, શ્રીકૃષ્ણદાસ્યભક્તિપ્રાપ્ત્યર્થે પાઠે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ ।
ૐ નારાયણઋષયે નમઃ શિરસિ ।
ૐ અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
ૐ શ્રીરાધિકા ત્રિપુરસુન્દરીદેવતાયૈ નમઃ હૃદિ ।
ૐ શ્રીકૃષ્ણદાસ્યભક્તિપ્રાપ્ત્યર્થે નમઃ નાભૌ ।
ૐ વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

કરન્યાસઃ ।
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ષડઙ્ગન્યાસઃ ।
ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં કવચાય હુમ્ ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ॥

અથ કવચમ્ ।

ॐ સર્વાદ્યા મેં શિરઃ પાતુ કેશં કેશવકામિની ।
ભાલં ભગવતી પાતુ લોલા લોચનયુગ્મકમ્ ॥ ૧॥

નાસાં નારાયણી પાતુ સાનન્દા ચાધરોષ્ઠકમ્ ।
જિહ્વાં પાતુ જગન્માતા દન્તં દામોદરપ્રિયા ॥ ૨॥

કપોલયુગ્મં કૃષ્ણેશા કણ્ઠં કૃષ્ણપ્રિયાઽવતુ ।
કર્ણયુગ્મં સદા પાતુ કાલિન્દીકૂલવાસિની ॥ ૩॥

વસુન્ધરેશા વક્ષો મે પરમા સા પયોધરમ્ ।
પદ્મનાભપ્રિયા નાભિં જઠરં જાહ્નવીશ્વરી ॥ ૪॥

નિત્યા નિતમ્બયુગ્મં મે કઙ્કાલં કૃષ્ણસેવિતા ।
પરાત્પરા પાતુ પૃષ્ઠં સુશ્રોણી શ્રોણિકાયુગમ્ ॥ ૫॥

પરમાદ્યા પાદયુગ્મં નખરાંશ્ચ નરોત્તમા ।
સર્વાઙ્ગં મે સદા પાતુ સર્વેશા સર્વમઙ્ગલા ॥ ૬॥

પાતુ રાસેશ્વરી રાધા સ્વપ્રે જાગરણે ચ મામ્ ।
જલે સ્થલે ચાન્તરિક્ષે સેવિતા જલશાયિની ॥ ૭॥

પ્રાચ્યાં મે સતતં પાતુ પરિપૂર્ણતમપ્રિયા ।
વહ્નીશ્વરી વહ્નિકોણે દક્ષિણે દુઃખનાશિની ॥ ૮॥

નૈરૃત્યે સતતં પાતુ નરકાર્ણવતારિણી ।
વારુણે વનમાલીશા વાયવ્યાં વાયુપૂજિતા ॥ ૯॥

કૌબેરે માં સદા પાતુ કૂર્મેણ પરિસેવિતા ।
ઈશાન્યામીશ્વરી પાતુ શતશૃઙ્ગનિવાસિની ॥ ૧૦॥

વને વનચરી પાતુ વૃન્દાવનવિનોદિની ।
સર્વત્ર સતતં પાતુ સર્વેશા વિરજેશ્વરી ॥ ૧૧॥

પ્રથમે પૂજિતા યા ચ કૃષ્ણેન પરમાત્મના ।
ષડક્ષર્યા વિદ્યયા ચ સા માં રક્ષતુ કાતરમ્ ॥ ૧૨॥

ઇતિ શ્રીનારદપઞ્ચરાત્રે શ્રીપરમાનન્દસન્દોહકવચં સમ્પૂર્ણમ્ ।

Encoded and proofread by Durga Sharma

*Shri Paramananda Sandoha Kavacham*

pdf was typeset on June 17, 2026

Please send corrections to *sanskrit@cheerful.com*